Chapter-2

# द्वितीयं प्रकरणम्

## १.२.० प्राचीनग्रन्थेषु वसिष्ठस्य वर्णनम्

### १.२.१ वसिष्ठः-

संहिताग्रन्थेषु वसिष्ठेन रचिताया वसिष्ठसंहिताया नाम प्रथममायाति।अत्र विषयाः सुगम्भीराः सुस्पष्टा निबद्धाः सन्ति। सर्वेषु वैदिकग्रन्थेषु, पुराणेषु, धर्मशास्त्रेषु, अन्येषु संस्कृतवाङ्मयेषु च वसिष्ठस्य स्थानं महत्त्वपूर्णं दरीदृश्यते। वसिष्ठविश्वामित्रयोः परिवादकथाः प्रथिताः सन्ति। सप्तर्षिमण्डलेषु वसिष्ठस्य अन्यतमस्थानम्। ज्योतिषशास्त्रस्यसष्टादशप्रवर्तकेषु वसिष्ठस्य नाम वर्तते। अतः स्वाभाविकीयं जिज्ञासा जागर्ति यदस्य वसिष्ठसंहितानामधेयस्य लौकिकसंस्कृते विरचितस्य रचयिता कतमो वसिष्ठः? पौराणिकपरम्परायां दृश्यते, यद् व्यासनाम्ना विदुषां परम्परा प्राचीनकालादेव समागता प्रतिभाति। एवमेव वसिष्ठनाम्नापि वैदिककालत आचार्यकालपर्यन्तं वसिष्ठाभिधा बहवो वसिष्ठा संजाताः।[३३]

संहिताकारेषु वसिष्ठपदप्रयोगे द्वौ भेदौ दृश्येते। कुत्रचिन्महर्षिवसिष्ठशब्दस्य प्रयोगो दृश्यते कुत्रचिद्वृद्धवसिष्ठशब्दस्योल्लेखः प्राप्यते। नामभेदेनापि ग्रन्थभेदो न दृश्यते। अतो वक्तुं शक्यते यद्वृद्धवसिष्ठ एव वसिष्ठः। वसिष्ठसंहिताग्रन्थे प्रत्येकाध्यायान्ते – इतिश्रीब्रह्मर्षि-वृद्धवसिष्ठसंहितायां ........... । इति उक्तम्। याज्ञवल्क्यस्मृतिटीकायां मिताक्षराया वृद्धवसिष्ठस्य मतमुद्धृतम्। एवं भट्टोजिदीक्षितोऽपि वृद्धवसिष्ठस्योल्लेखं करोति। अतः

३३ वसिष्ठसंहिता – गिरिजाशंकर शास्त्री, पुरोवाक् पृ. ७–८

वृद्धवसिष्ठनाम्ना कोऽपि धर्माचार्य आसीदिति मन्यते।[३४]

### १.२.२ वसिष्ठशब्दस्य व्याकरणशास्त्रीयं स्पष्टीकरणमितिहासश्च –

वशिष्ठः पु.। वशवतां वशिनां श्रेष्ठः। वशवत् + इष्ठन्। "विन्मेतोर्लुक्।।" ५/३/६५ इति पाणिनिसूत्राल्लुकस्तद्वा वशिष्ठः। पृषोदरादित्वात् साधु।[३५] अस्य निरुक्तिर्यथा–

वशिष्ठोऽस्मि वरिष्ठोऽस्मि वेशे वासगृहेष्वपि।

वशिष्ठत्वाच्च वासाच्च वशिष्ठ इति विद्धि माम्।। महाभारते १३/९३/८९

ऋग्वेदस्य सप्तमं मण्डलं वसिष्ठमण्डलं वर्तते। ऋग्वेदस्य महामृत्युञ्जयमन्त्रो वसिष्ठद्वारा दृष्टः। ऋग्वेदस्य रक्षोघ्नसूक्तस्य प्रणयनस्य श्रेयो वसिष्ठाय गच्छति। बृहद्देवतानुसारेण तत्सूक्तस्य सन्दर्भो वसिष्ठविश्वामित्रयोर्विरोधेन सह संयुक्तोऽस्ति।

तैत्तिरीयसंहितायां प्राप्त एकोनपञ्चाशद्रात्रियागस्य जनको वसिष्ठ इति मन्यते। विपाशसरित्तटे वसिष्ठस्य वसिष्ठशिला नामक एक आश्रम आसीत्। तथा च तस्यैवान्यः कृष्णशिला नामक आश्रमे स तपस्यां कुर्वन् समस्तपृथिव्यां पौरोहित्यं प्राप्नोति। निमिनृपस्य शापेन वायुरूपं भूत्वा वसिष्ठो ब्रह्मणा समीपे गत्वा मित्रावरुणीवीर्येण कुम्भे जात इति पुराण उल्लेखोऽस्ति।[३६]

वसिष्ठो हिरण्यनामा कौशल्यनाम्न आचार्यस्य जैमिनि-आचार्यस्य शिष्य आसीत्। जैमिनिस्तं पञ्चाशद्वेदसंहिता अपाठयत्। यान्यनन्तरं स याज्ञवल्क्यनाम्ने शिष्याय प्रदत्तवान्।

---

३४ धर्मशास्त्र का इतिहास(प्रथमभाग) पृ. २२

३५ वसिष्ठसंहिता पुरोवाक् – पृ.९

३६ भारतवर्षीय प्राचीनचरित्रकोष, पृ. ८०४-८०६

श्रीमद्भागवते वसिष्ठस्योत्पत्तिर्ब्रह्मण: प्राणेभ्यो जाता[३७]– इति वर्णितम्। महर्षिवसिष्ठस्य पत्नी कर्दम–ऋषिकन्या अरुन्धती आसीत्। वसिष्ठो ब्राह्मणेषु, ब्राह्मणकुलेषु वा सर्वश्रेष्ठोऽस्ति। वसिष्ठ: मन्त्रदृष्टा ऋषि: वशिष्ठो ब्रह्मापुत्र इति सर्वत्राख्यानमस्ति। ऋग्वेदस्य सप्तममण्डलं वसिष्ठस्य मण्डलं वर्तते। तत्र सर्वे मन्त्रा वसिष्ठकुलजैर्दृष्टा: सन्ति। वस् धातोरुत्पन्नो वसिष्ठशब्द: श्रेष्ठत्वं सूचयति। ऋग्वेदे वसिष्ठऋषिरुर्वशीवरुणयो: पुत्र इत्युक्तम्। अतो मैत्रावरुणिरिति नाम्ना ख्यात:। पार्जिटरानुसारेण मैत्रावरुण इति वसिष्ठस्य व्यक्तिनाम। कल्पारम्भे सृष्टिनिमित्तं ब्रह्मा सर्वप्रथमं मानससृष्टौ सप्तर्षीणामेव सृष्टिं चकार– इति सर्वत्र प्रथितं दृश्यते। एतेन कल्पारम्भ एव वसिष्ठस्य सृष्टिर्जाता –इति निश्चयात् सतयुग एव वसिष्ठस्य स्थिति: सम्भवा। वसिष्ठ: स्वायंभुवमन्वन्तरोत्पन्न एक ऋषि:, ब्रह्मणो दशपुत्रेषु एकपुत्र इति मन्यते। यो ब्राह्मणवंशीयोत्पन्नो मूलपुरुष इक्ष्वाकुवंशोत्पन्ननृपाणां पुरोहित आसीदिति मन्यते। यो ब्रह्मणा प्राणवायु(समान)त: उत्पन्न आसीत्। (भा ३, १२, २३) दक्षप्रजापतिकन्या नाम्ना ऊर्जा तस्य पत्नीरासीत्। ब्राह्मणवंशीययोर्वसिष्ठविश्वामित्रयो: शत्रुत्वं देवराजवसिष्ठत: मैत्रावरुणिवसिष्ठकालपर्यन्तं दरीदृश्यते। ऋग्वेदे वसिष्ठविश्वामित्रयो: शत्रुत्वविषये स्पष्टनिर्देशो न दृश्यते, किन्तु गेल्डनरानुसारेण ऋग्वेदे वसिष्ठविश्वामित्रयो: शत्रुत्वम्, न तु वसिष्ठस्य पुत्रेण शक्त्या सह संघर्ष इति निर्देश:। ऋग्वेदस्य तृतीयमण्डले वसिष्ठद्वेषिणो नाम्ना वसिष्ठविरोधीमन्त्र: प्राप्त:। स वसिष्ठपुत्रं शक्तिं प्रति निर्देशं करोति। वसिष्ठस्य परिवारविषय उक्तम् — यत् तस्य द्वौ पत्न्यावासीताम्। (१) दक्षप्रजापतिकन्या नाम्ना ऊर्जा तथा (२) कर्दमप्रजापतेरष्टमकन्या नाम्ना अरुन्धती। तस्या: शतरूपा नामान्यैका कन्यासीत्।

---

३७ उत्सङ्गान्नारदो जज्ञे दक्षोङ्गुष्ठात्स्वयम्भुव:।
प्राणाद् वसिष्ठ: सञ्जातो भृगुस्त्वचि करात्क्रतु:।।२३।। (स्कन्ध–३, अ. १२, श्लो. २३)

पार्जिटरानुसारेण कालक्रमेण वसिष्ठवंशोत्पन्ना निम्नलिखिता व्यक्तिः प्राचीनभारतीयेतिहासे विशेषं महत्त्वपूर्णा प्रतीता।[३८]

**वसिष्ठदेवराजः** -- योऽयोध्यानृपस्त्रय्यरुणस्तथा हरिश्चन्द्रस्य समकालीन आसीत्। यो विश्वामित्रऋषेः समकालीन आसीत्।

**वसिष्ठ—आपवः** -- यो हैहयनृपकार्तवीर्यस्य समकालीन आसीत्।

**वसिष्ठ -अथर्वनिधिः (प्रथमः)** -- योऽयोध्यानृपस्य बाहोः समकालीन आसीत्।

**वसिष्ठश्रेष्ठभाजः** -- यः कल्माषपादस्य सौदासनृपस्य समकालीन आसीत्।

**वसिष्ठ-अथर्वनिधिः (द्वितीयः)** — योऽयोध्यानृपस्य दिलीपस्य खट्वाङ्गनृपस्य समकालीन आसीत्।

**वसिष्ठः** -- राजादशरथस्यैव रामस्य समकालीन आसीत्।

**वसिष्ठमैत्रावरुणः** — य उत्तरपाञ्चालदेशस्य पैजवनसुदासस्य राज्ञः समकालीन आसीत्।

ऐतरेयब्राह्मणे वसिष्ठो नृपस्य सुदासस्य पुरोहित एवमभिषेककर्ता-इत्युल्लेखः संप्राप्यते।

महाभारत एवं पुराणेषु वसिष्ठवंशावली नाम्ना अरुंधतीशाखा, घृताचीशाखा, एवं व्याघ्रीशाखा —एतयोः शाखयोर्विषयोल्लेखः संप्राप्यते। तथैव वसिष्ठकुलगोत्रकारेष्वेकप्रवरात्मकास्तथा त्रिप्रवरात्मकाः- एवं प्रकारद्वयम्।

त्रेतायुगे सूर्यवंशेन सह महर्षिवसिष्ठस्य पौरोहित्यं सर्वे जानन्ति। वाल्मीकिरामायणे (१/१२/१०) महर्षिवसिष्ठेन पुत्रकामेष्टियज्ञस्यानुष्ठानाय प्रार्थित इति वर्णनं समुपलभ्यते। वेदविज्ञान-सृष्टिविज्ञान-ब्रह्मविज्ञानादिषु ज्ञाता स राजपुत्रान् वेदविद्याभिः सहैव धनुर्विद्याया

---

३८ भारतवर्षीय प्राचीनचरित्रकोष पृ. ८०६

अप्यध्यापनं कृतवान्। वाल्मीकियाख्यानमवलोक्य तस्य महद्वैशिष्ट्यं ब्रह्मतेजो ज्ञातं भवति। अतः त्रेताकालिको वसिष्ठः सतयुगकालिकोऽपि भवितुमर्हतीति कल्पितुं शक्यते। श्रीमद् भागवतेऽपि वशिष्ठस्य परिचयो बहुधा दृश्यते।[३९]

**महाभारतानुसारेण –**

ब्राह्मणपुत्रो भगवतः शङ्करस्य शापेन दग्धो भवति। वर्तमानमन्वन्तरप्रारम्भे ब्रह्मणा स पुनर्जीवितः क्रियते। वह्नेर्मध्यभागोत्पन्न आसीत्। तथाक्षशीला नाम्नी तस्य पत्न्यासीत्।

वसिष्ठो धर्मशास्त्रकारो वसिष्ठस्मृतिर्नाम्ना स्मृतिग्रन्थं रचिवान्। वसिष्ठधर्मस्यैवं गौतमसूत्रस्याधिकांशसूत्राः समानाः। वसिष्ठधर्मसूत्रमृग्वेदशाखाया ग्रन्थः। बृहदारण्यकोपनिषदः शाङ्करभाष्ये बहवः सूत्रा वसिष्ठधर्मसूत्रादुद्धृताः। वसिष्ठस्य ग्रन्थद्वये वेदसंहितात उद्धरणानि सन्ति। तत्र मनु–हारीत–यम–गौतमादिधर्मशास्त्रकाराणां मतानि प्रदर्शितानि सन्ति। मनुस्मृतौ तथा याज्ञवल्क्यस्मृतिग्रन्थे वसिष्ठस्मृतेरुल्लेखः संप्राप्यते।

वृद्धवसिष्ठेनान्य एको स्मृतिग्रन्थोऽपि रचितः स्यात्, यस्य निर्देशो विश्वरूपेण (१.१९) तथा मिताक्षराकारेण(२.९१) कृतः। तस्य ज्योर्तिवसिष्ठ इति नाम्ना कानिचनोद्धरणानि स्मृतिचन्द्रिकाग्रन्थे संप्राप्यन्ते। स्मृतिचन्द्रिकाग्रन्थे तथा भट्टोजिकृतायां चतुर्विंशतिमतटीकायां वृद्धवसिष्ठविषय उल्लेखोऽस्ति। वसिष्ठधर्मसूत्रे चतुर्वेदानामुद्धरणाणि संप्राप्यन्ते। तत्र मुख्या विषयाः – धर्मस्य परिभाषा, चतुर्वर्णानां विशेषाधिकारा तथा कर्तव्याणि चतुर्वर्णाश्रमधर्मास्तथा ब्रह्मचारिकर्तव्याणि गृहस्थस्य कर्तव्याणि, अतिथिसत्कारः,संन्यासीनां कृते नियमाः, वेदाध्ययनं, न्यायशासनं, दत्तकपुत्रविचारः, प्रायश्चित्तं, नारीप्रशंसा, दानानीत्यादयः। वृद्धवसिष्ठनाम्ना कोऽपि धर्माचार्य आसीदिति मन्यते।

---

३९ वसिष्ठसंहिता पुरोवाक् – पृ.१०–११

वसिष्ठस्य नाम्ना नैकेऽन्ये ग्रन्थाः सन्ति। यथा वसिष्ठस्मृतिः,वसिष्ठकल्पः, वसिष्ठतन्त्रम्, वसिष्ठलिङ्गपुराणम्, वसिष्ठपुराणम्, वसिष्ठशिक्षा, वसिष्ठश्राद्धकल्पः, वसिष्ठसंहिता, वसिष्ठहोमप्रकारः- इत्यादयः।

### १.२.३ श्रीब्रह्मर्षिवृद्धवसिष्ठेन विरचिता अन्ये ग्रन्थाः—

हस्तलिखितरूपेण प्राच्यविद्यामन्दिरे विद्यमाना ग्रन्था यथा-

**अनुक्रमः -** १,

क्रमसंख्या १२११३ विषयः : ज्योतिषम्

ग्रन्थनाम- वसिष्ठसिद्धान्तः, गणितस्कन्धः:

पत्राणि : ३४ प्रमाणम् १०००(श्लोकाः) अध्यायाः : १५

प्रारम्भः- नमस्ते विश्वरूपाय पराय परमात्मने योगिध्येयाय शांताय कालरूपाय विष्णवे। निमिषक्षेत्रे वामदेवो द्विजोत्तमः अभिवाद्य सुखासीनं---

प्रत्येकेष्वध्यायेषु समागतानां विषयानां सूचि :

| अध्यायक्रमः | विषयः | अध्यायक्रमः | विषयः |
|---|---|---|---|
| १ | मध्यमाधिकारः | २ | स्पष्टाधिकारः |
| ३ | त्रिप्रश्नाधिकारः | ४. | चन्द्रग्रहणाधिकारः |
| ५ | सूर्यग्रहणाधिकारः | ६ | परिलेखाधिकारः |
| ७ | ताराग्रहाधिकारः | ८ | नक्षत्रध्रुवाधिकारः |
| ९ | ग्रहोदयास्ताधिकारः | १० | संयोगत्यधिकारः |
| ११ | पाताधिकारः | १२ | भूगोलाधिकारः |
| १३ | ग्रहकक्षाधिकारः | १४ | गोलाध्यायः |

१५ अभिमानाध्याय:

पुष्पिका - इतिब्रह्मर्षिवृद्धवसिष्ठप्रणीते गणितस्कन्धप्रतिविश्वप्रकाशेऽभिमानाध्याय

ग्रन्थ: ८०० ।ऽ। ऽ।ऽ श्रीगोपालाय नमो नम:। ।। राम राम।।

**अनुक्रम: - २,**

क्रमसंख्या १३४२१(अेच) विषय: : ज्योतिषम्

ग्रन्थनाम- वसिष्ठसिद्धान्त:

पत्राणि : १४३-१५० प्रमाणम् १२०(श्लोका:) अध्याया: : १५

तालपत्रम् , नन्दिनागरी लिपि:

सिद्धान्तविषया अत्र समाहिता:।

**अनुक्रम: - ३**

क्रमसंख्या ३२९४ विषय: : ज्योतिषम्

ग्रन्थनाम- वसिष्ठसिद्धान्त:, नक्षत्रविधानम् समय: -१६६४ संवत्(१६०८ खिस्ताब्दम्)

पत्राणि : ११ प्रमाणम् १७०-१९०(श्लोका:) अध्याया: : १५

प्रारम्भ: - श्रीरामचन्द्राय नम: वसिष्ठो उवाच रामोवाच सवितादिग्रहान्सर्वान् प्रणम्य ऋषिसप्तमो नवग्रहमखं ब्रूते वसिष्ठो मुनिपुंगव:

मुख्यविषय: - नवग्रहशान्ति:।

अन्तिमपुष्पिका - इति वसिष्ठोक्ता वासिष्ठी समाप्त। सं १६६४ चैत्र वदि अष्टमी भौमे लिखितम्।

**अनुक्रमः - ४,**

क्रमसंख्या ३२९३ विषयः : ज्योतिषम्

ग्रन्थनाम- वसिष्ठसिद्धान्तः, भूगोलाध्यायः

पत्राणि : ६ प्रमाणम् ९३(श्लोकाः)

प्रारम्भः - श्रीगणेशाय नमः। अथ वसिष्ठसिद्धान्तो लिख्यते। अणिमादिगुणाधारं अप्रत्यर्क अगोचरं निर्गुणं निरवद्यं नमामि ब्रह्म सर्वदा।

अन्तिमपुष्पिका - इति वसिष्ठसिद्धान्ते भूगोलाध्यायः।

**अनुक्रमः - ५**

क्रमसंख्या ९३२५ विषयः : ज्योतिषम्

ग्रन्थनाम- वसिष्ठसिद्धान्तः, गणितस्कन्धः:

पत्राणि : २५ प्रमाणम् ७००(श्लोकाः) अध्यायाः : १५

प्रारम्भः - श्रीगणेशाय नमः। श्रीसूर्याय नमः। श्रीगुरुभ्यो नमः। नमस्ते चित्स्वरूपाय पराय परमात्मने । योगिध्येयाय शान्ताय कालरूपाय विष्णवे।।

प्रत्येकाध्यायेषु समागतानां विषयानां सूचि :

| अध्यायक्रमः | विषयः | अध्यायक्रमः | विषयः |
|---|---|---|---|
| १ | मध्यमाधिकारः | २ | स्पष्टाधिकारः |
| ३ | त्रिप्रश्नाधिकारः | ४. | चन्द्रग्रहणाधिकारः |
| ५ | सूर्यग्रहणाधिकारः | ६ | परिलेखाधिकारः |
| ७ | ताराग्रहाधिकारः | ८ | नक्षत्रध्रुवाधिकारः |
| ९ | ग्रहोदयास्ताधिकारः | १० | संयोगत्यधिकारः |

| | | | |
|---|---|---|---|
| ११ | पाताधिकार: | १२ | भूगोलाधिकार: |
| १३ | ग्रहकक्षाधिकार: | १४ | गोलाध्याय: |
| १५ | अभिमानाध्याय: | | |

अन्तिमपुष्पिका– इति ब्रह्मर्षिवृद्धवसिष्ठप्रणीते गणितस्कन्धे विश्वप्रकाशे ग्रहकक्षाध्याय:।

### १.२.४ वसिष्ठस्य समय:

संहिताग्रन्थेषु वृद्धवसिष्ठविरचितताया वृद्धवसिष्ठसंहिताया रचनाकालविषये निश्चितरूपेण समयनिर्धारणं कर्तुं न शक्नोति। तथापि बाह्यान्तरसाक्ष्यरूपेण किंचिद्विचार्यते।

१ वसिष्ठसंहिताटीका विश्वनाथेन कृतासीत्। तद्विषयेऽधिकं न ज्ञायते। विश्वनाथस्य काल: ख्रि. १६२९ (शके १५५१) । अत: तत्पूर्वं वसिष्ठस्य काल इति वक्तुं शक्यते।

२ रामदैवज्ञरचित–मुहूर्तचिन्तामणीग्रन्थे वसिष्ठेन प्रोक्ता: श्लोका: संप्राप्यन्ते। तस्य काल: ख्रि. १६०० (शके १५२२)। अत: तत्पूर्वं वसिष्ठस्य काल इति वक्तुं शक्यते।

३ बल्लालसेनरचित–अद्भुतसागरग्रन्थे वसिष्ठस्य विषय उल्लेख: संप्राप्यते। तस्य काल: ख्रि. ११६८ (शके १०९०) । अत: तत्पूर्वं वसिष्ठस्य काल इति वक्तुं शक्यते।

४ पद्मनाभरचितव्यवहारप्रदीपग्रन्थे वसिष्ठसंहिताश्लोका: संप्राप्यन्ते । तस्य काल: ख्रि. ११५० (शके १०७२)। अत: तत्पूर्वं वसिष्ठस्य काल इति वक्तुं शक्यते।

५ भट्टोत्पलस्य बृहत्संहिताटीकायां वसिष्ठसंहिताश्लोका: संप्राप्यन्ते। तस्य काल: ख्रि. ९६६ (शके ८८८) । अत: तत्पूर्वं वसिष्ठस्य काल इति वक्तुं शक्यते।

६ वराहमिहिरस्योपरि वसिष्ठस्य प्रभावो स्पष्टतया द्रष्टुं शक्यते। तस्य काल: ख्रि. ५०५ (शके ४२७, गणकतरङ्गिणी–आधारेण)। अत: तत्पूर्वं वसिष्ठस्य काल इति वक्तुं शक्यते।

बृहत्संहितायां प्रासादलक्षणाध्याये (अ. ५६) उपसंहारश्लोके वसिष्ठस्य मतं प्रदर्शितम्–

प्रासादलक्षणमिदं कथितं समासाद्गर्गेण यद्विरचितं तदिहास्तसर्वम्।

मन्वादिभिर्विरचितानि पृथूनि यानि तत्संस्पृशन् प्रति मयात्र कृतोऽधिकार: ।।३१ ।।

वसिष्ठसंहितायां नवमाध्याये, राहुचाराध्याये प्रतिपादितम् –

प्रच्छन्नरूपं धृत्वा राहु: सुधाप्रदानेऽभूत्।

हरिरपि निखिलं ज्ञात्वा च्छिनद्धि चक्रेण तच्छीर्षम्।।१।।

अमृतमयत्वान्मत्वा हरिं शिर उवाच विस्मिते सदसि।

दातव्या ग्रहसमता गतोऽस्मि मां रक्ष तव शरणम्।।२।।

दत्त्वाष्टमग्रहत्वं पीतो विसर्ज तं राहुम्।

धातृवराश्चन्द्रमसं तुदति तत: सर्वपर्वणि च।।३।।

एतेषामेव श्लोकानामनुसरणं कृत्वा वराहमिहिरस्तस्य बृहत्संहिताया राहुचाराध्याय उक्तवाम्–

अमृतास्वादविशेषाच्छिन्नमपि शिर: किलासुरस्येदम्।

प्राणैरपरित्यक्तं ग्रहतां यातं वदन्त्येके ।।१।।

इन्द्वर्कमण्डलाकृतिरसितत्वात् किल न दृश्यते गगने।

अन्यत्र पर्वकालाद्वरप्रदानात् कमलयोने:।।२।।

मुखपुच्छविभक्ताङ्गं भुजङ्गमाकारमुपदिशन्त्यन्ये।

कथयन्त्यमूर्त्तमपरे तमोमयं सैहिकेयाख्यम्।।३।।

केतुचाराध्यायेऽपि एवमेव साम्यं दृष्टुं शक्यते। विषयप्रवर्तने, शब्दचयने, छन्दोबन्धने च साम्यं दृश्यते। अस्य टीकायां " सिंहो वृषं प्रथमं मेषं " इत्यादि चतुर्दशश्लोकटीकायां वसिष्ठस्योल्लेखो दृश्यते।[४०]

पद्मनाभमिश्रस्य परिचये गणकतरङ्गिण्यामुक्तम् – [४१]

---

४० गणकतरङ्गिणी – पृ. १४

४१ गणकतरङ्गिणी – पृ. २५

दिव्यं ज्ञानमतीन्द्रियं यदृषिभिर्ब्राह्मं वसिष्ठादिभिः

पारंपर्यवशाद्रहस्यभवनीं नीतं प्रकाश्यं पुनः।

नैतद् द्वेषिकृतघ्नदुर्जनदुराचाराचिरावासिने

स्यादायुःसुकृतक्षया मुनिकृतां सीमामिमामुज्झतः।।

भास्करीये गोलाध्यायच्छेदकाधिकारस्य ९ श्लोक उक्तम् । अत्र वसिष्ठस्य सुस्पष्टं निर्देशः। तथा च तत्रैव निर्दिष्टम्।

वसिष्ठेन –

छन्दः पादौ शब्दशास्त्रं च वक्त्रं

कल्पः प्राणो ज्यौतिषं चक्षुषी च।

शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं

वेदस्याङ्गान्याहुरेतानि षट् च।।

यो वेद वेदनयनं सदनं हि सम्यग्ब्राह्म्यं

स वेदमपि वेद किमन्यशास्त्रम्।

यस्मादतः प्रथममेतदधीत्य धीमा-

न्शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।[४२]

(भास्करीयगोलाध्यायस्य ८ श्लोकोऽयं तत्र वेदनयनमित्यत्र वेदवदनमिति पाठं कृत्वा भास्करेण व्याकरणप्रशंसा कृता।)

एतेनेदं वक्तुं शक्यते यत्- ज्योतिषसंहिताकारस्य वसिष्ठस्य समयो वराहमिहिरपूर्वकाले (ख्रि.५०५) शक्यते। उपलब्धसंहिता प्रायेण

४२ गणकतरङ्गिणी – पृ. २६

भट्टोत्पलपूर्वकालीनास्तीति(ख्रि.९६६) निश्चयेन वक्तुं शक्यते। अथ वसिष्ठसंहिता प्राचीनो ग्रन्थः, किन्तु तद्विषयेऽधिकांशजना न जानन्ति तथा चायं ग्रन्थो बहुप्रचलितो नास्ति।

## १.२.५ उपसंहारः

संहिताकारेषु वसिष्ठः, वसिष्ठवासिष्ठशब्दस्य व्याकरणशास्त्रीयं स्पष्टीकरणम्,इतिहासः, वसिष्ठविषये वेदे साहित्ये च धर्मशास्त्रेषु संदर्भाः श्लोकाश्च, बाह्यसाक्ष्यं आन्तरीकसाक्ष्यं समयस्य निर्धारणम् , उपसंहारः।